संस्कृत -

प्रयोग - स्मार्त

क्र. नं. ९५३

विवाह प्रयोग

३३९६

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(1)

अथविवाहप्रयोगप्रारंभः ॥ शाके १७३८
धातृनामसंवत्सरेवैशाखशुद्धतृतीयाभौमवा०

" Joint project of Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

 श्रीगणेशाय नमः॥ अथ विवाहप्रयोगः॥ आचम्य प्राणानायम्य इष्टदेवतागुर्वादीन्नमस्कृ 
त्य देशकालौ संकीर्त्य॥ ममास्याममुकनाम्न्याः कन्यायाः ब्राह्मविवाहविधिना विवाहसंस्का
रं करिष्ये॥ वरपिता॥ ममास्याममुकशर्मणः पुत्रस्य विवाहसंस्कारं करिष्ये॥ तदंगं गणेश
पूजनं पुण्याहवाचनं मातृकापूजनं नांदीश्राद्धं ग्रहाणामानुकूल्यार्थं ग्रहयज्ञं मंड
पदेवताप्रतिष्ठापनं च करिष्ये॥ ममकन्यकायाः करिष्यमाणविवाहाख्यकर्मणः पुण्याहं भ
वंतो ब्रुवंतु॥ अग्निः प्रीयतां॥ उत्तरीयात्कुर्यात्॥ अथ वरस्य सीमांतपूजनं॥ कन्यावि
वाहांगभूतं सीमांते वरपूजनं करिष्ये॥ तदंगं गणेशपूजनं करिष्ये॥ गणेशं संपूज्य वर
रपुरोहितपूजनं कृत्वा वरस्य पादौ प्रक्षालयेत्॥ अस्मिन्राष्ट्रेश्रियं॰ हंतु मे॥ गंधमा
ल्यवस्त्रनारिकेरफलानि दद्यात्॥ कृतस्य कर्मणः सांगतासिध्यर्थं॰ यांतु देवगणाः॰ च॥ १
अथ घटिकास्थापनं॥ अथ वरयोः परस्परनिरीक्षणे पाणिग्रहणे च शुभमस्तु कृत्तसा

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "Joint project of"

(2A)

धनार्थंघटिकास्थापनंकरिष्ये।।तदंगंगणेशपूजनंवरुणपूजनंचकरिष्ये।।गणे
शंवरुणंचसंपूज्य।।गृहावैप्रतिष्ठासूक्तं॰ नर्यप्रजां॰ घटिकांजलेप्रतिष्ठाप्यप्रा
र्थयेत्।।मुख्यंत्वमसियंत्राणांब्रह्मणानिर्मितंपुरा।।भावाभावायदंपत्योःकाल
साधनकारणं।।ततोगौरीनंदनगौरवर्णवदनश्शृंगारलंबोदरासिंदूरांचितदि
गाजेंद्रवदनःपाणौरुणंनुपुरं।।कपोलंबविलंबगंडविलसत्कंठेचमुक्तावली
शुंडादंडविभूषितोगणपतिर्दद्यादलंमंगलं।।मंगलश्लोकंपठेत्।।ततोगौ
रीहरपूजा।।वरप्रस्थानं।।कनिक्रदज्जनुं॰ दूयमेवसायाप्रं॰ अथकन्यावरणं
।।वरपित्रादिनामान्यविप्रान्समाहूय।।अनृक्षराऋजवःसंतुपंथायेभिःसखा
यायंतिनोवरेयं।।समर्यमासंभगोनोनिनीयात्संजास्पत्यंसुयममस्तुदेवाः।।दे

(3)

वि॰प्र॰ वींवाचंमजनयंतदे॰ तेतु॥ द्वाभ्यांशुभेवस्त्रपीठासनेप्राङ्मुखींकन्यामुपवेश्य॥ तद्धस्तेफलतां

२ बूलादिदत्वाकन्यापित्रादिसमीपेगणपत्यादिस्मरणपूर्वकं गोत्रप्रवरशुद्धिंकुर्यात्॥ का

श्यपावत्सारने॰ स्नात्रायअमुकशर्मणः प्रपौत्रायअमुकशर्मणः पौत्रायअमुकशर्म

णः पुत्रायअमुकशर्मणेवराय॥ वासिष्ठेंद्रप्रम॰ गोत्रोत्पन्नांअमुकप्रपौत्रींअमुकपौत्रीं

अमुकपुत्रीअमुकनाम्नींकन्यां॥ भार्यात्वायवृणीमहे॥ कन्यादाताभार्याज्ञातिबांधवानु

मतिंकृत्वा॥ वृणीध्वं॥ इतिवदेत्॥ एवंपुन[illegible]॥ महास्याभि३ उच्चैस्त्रिर्वदेत्॥ ततोवरपित्रा

दिकन्यापुरोहितंसंपूज्य गंधाक्षतशुभवस्त्रयुग्मभूषणतांबूलपुष्पादिभिःकन्यांपू

जयेत्तं प्रदायागतैर्मंत्रैः॥ पुर्ववस्त्राणि॰ हिरण्यरूपःसहिरण्य॰ याःफलिनीर्याअ॰ २

त्वंहसः॥ अर्वाचीसुभगेभवसीतेवंदामहेत्वा॥ यथानःसुभगाससियथानःसुफला

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(3A)

मस्ति॥ ॥अथवाग्दानं॥दाताकन्यांवामतउपवेश्य॥उभौदेशकालौसंकीर्त्य
॥अमुकनाम्नाःकन्यकायाःकरिष्यमाणविवाहांगभूतंवाग्दानमहंकरिष्ये॥तदं
गंगणेशपूजनंवरुणपूजनंकरिष्ये॥कृत्वास्वस्थानेकन्यापूजयितारमुपवेश्यस्व
यंतत्प्राच्यांप्रत्यङ्मुखउपविश्यगंधतांबूलादिनापूजयेत्॥ सचकन्यादातारं॥कन्या
दाताहरिद्राखंड पंचहृदृ पुगीफलानिचगंधाक्षतालंकृतानिगृहीत्वापूर्ववद्वर
गोत्रस्वगोत्रादिपठित्वाअमुकनाम्नीमिमांकन्यांज्योतिर्विदादिष्टेशुभेमुहूर्तेदास्ये॥
वाचासंप्रददे॥अव्यंगेपतितेक्लीबेदशदोषविवर्जिते॥इमांकन्यांप्रदास्यामिदेवा
ग्निद्विजसंनिधौ॥वरपित्रादिवस्त्रप्रांतेपुगीफलादिप्रक्षिप्यतदस्तुमित्रावरुणा॰
गृहावेप्रतिष्ठास्त॰ नर्यप्रजांमेगोपा॰ वस्त्रेबध्वाचंदनेनचर्चयेत्॥वरपित्रादिर्हं
रिद्राखंडादितथैवगृहीत्वा॥अमुकगोत्रअमुकवरविषयेभवंतोनिश्चिताभवं

(५)

वि॰प्र॰ तु॥ दात्व वस्त्र ग्रांते प्रक्षेपादि पूर्ववत्कुर्यात्॥ दाता॥ वाचादत्ता मयाकन्यापुत्रा
२ र्थंस्वीकृता त्वया॥ कन्यावलोकनविधौनिश्चिंतस्त्वंसुखीभव॥ वरपितरं प्र
तिपठेत्॥ वरपिता॥ वाचादत्तात्वयाकन्यापुत्रार्थंस्वीकृतामया॥ व[illegible]रावलो
कनविधौनिश्चितस्त्वंसुखीभव॥ दातारंप्रतिपठेत्॥ व्रात्रीदौविवाहेवरार्थंस्वीकृतामयाइ
त्यूहः॥ ब्राह्मणाः॥ शिवाआपःसंतु॥ सौमनस्यमस्तु॥ अक्षतंचारिष्टंचास्तु॥ दीर्घमा
युःश्रेयःशांतिःपुष्टिस्तुष्टिश्चास्तु॥ एतद्वःसत्यमस्तु॥ समानीवआकूतिःसमानाहृ
दयानिवः॥ समानमस्तुवोमनोयथावःसुसहासति॥ प्रसुग्मंताधियसानस्यसक्ष
णिवरेभिर्वरांअभिषुप्रसीदतः॥ अस्माकमिंद्रउभयंजुजोषतियत्सोम्यस्यांधसो
बुबोधति॥ दाता॥ ममकन्यकायाःविवाहसौभाग्याद्यभिवृध्यर्थंशचीपूजनंमहं ३
करिष्ये॥ अस्मिन्पुगीफलेशचीसांगांसपरिवारांसायुधांसशक्तिकामावाहयामि॥

(3A)

त्राण्येनमः॥ध्यानादिपूजयेत्॥कन्येवंप्रार्थयेत्॥देवेंद्राणिनमस्तुभ्यंदेवेंद्रप्रियभा
मिनि॥विवाहंभाग्यमारोग्यंपुत्रलाभंचदेहिमे॥ततःपुरंध्रीभिर्नीराजनंकार्यं॥संपूजि
ताविप्राआशीर्मंत्रान्पठेयुः॥समिध्यस्यत्रयमाणः॰वनस्पतेशतवल्शो॰संदिव्येनदी
दिहिरोच॰बृहस्पतेसवितर्बोधय॰चतुःशिखंडायुवतिः॰सौभगाय॥नर्यप्रजां॰॥ऋग्वे
दिनांतु॥हिंकृण्वतीवसुपत्नी॰समिद्धस्याभयमाणःपु॰वनस्पतिशतवल्शोविरोहस
हस्रवल्शाविवयंरुहेम॥यंत्वामयंस्वधितिस्तेजमानःप्रणिनायमहतेसौ॰इंद्रेदे
वानामुपसख्यमायसहस्रधारःपवतेमदाय॥नृभिःस्तवानोअनुधामपूर्वमं
गंनिंद्रंमहतेसौभागाय॥४॥अस्यापिबक्षमतःप्रस्थितस्येंद्रसोमस्यवरमासु
तस्य॥स्वस्तिदामनसामादयस्वार्वाचीरेवतेसौभागाय॥५॥घृतादुल्लुप्तंमधु
मत्सुवर्णंधनंजयंधरुणंधारयिष्णु॥ऋणक्सपत्नाधदधरांश्चकृण्वदारोहमां

विवा-प्र महहेतेसौभाग्गाय॥६॥तदस्तुमित्रावरु०॥गृह्णावैप्रतिष्ठा० ततोमुहूर्तपूजा॥विवा
४ हेसुमुहूर्त्तसाधनार्थंवधूवरयोः आयुष्याभिवृध्यर्थंचमुहूर्तपत्रिकापूजनं
करिष्ये॥प्रणोदेवीसरस्वती० कृतस्यकर्मणःसांगतासिध्यर्थंब्राह्मणानांधा
दिनापूजयिष्ये॥यांतुदेवगणाः०॥ ॥अथमधुपर्कः॥ ॥दातासपत्नीक
आचम्यदेशकालौसंकीर्त्यविवाहार्थमुपस्थितंवरंमधुपर्केणार्हयिष्ये॥पूज
कः॥ॐ अर्घोर्घोर्घः॥वरःकुरुत॥कूर्चःकूर्चःकूर्चः॥सुकूर्चः॥राष्ट्रभृदस्या
चार्यासंदीमात्वद्योषं॥उदगग्रेकूर्चेप्राङ्मुखउपविशेत्॥पाद्यंपाद्यंपाद्यं॥सु
पाद्यं॥अस्मिन्राष्ट्रे० चरणंपवित्रं०॥वरोहिराचम्य॥विराजोदोहोसिमयिदोहःप
द्यायैविं॰जः॥योस्यपादौप्रक्षाल्ययतितस्यहस्तावभिमृश्य॥आत्मानंप्रत्य ४
भिमृशति॥मयि ~~इंद्रि~~यंतेजइंद्रियंवीर्यंबलं॥अपअपउपस्पृश्य॥गंधे
र्यमायुःकीर्तिर्वर्चोयशोबलं॥१

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan

जतेजसावर्चसाय भसाय॥ तं मा कुरु प्रियं प्रजानामधिपतिं २ ग्ने ४

(5A)

माल्यवस्त्रालंकारादिसहितमर्घ्यजलमादाय॥ अर्घ्यमर्घ्यमर्घ्यं॥ स्वर्घ्यं॥
आमागन्यशसासं॰ स्तं॰ पशूनां॥ वरोमुंत्रमुक्त्वा अंजलौ पूजके नाकिंचिन्नि
नीयमानमर्घ्योदकं प्रतिगृह्णाति॥ अवशिष्टमर्घ्यजलं पूजकाय प्रदाय॥
समुद्रं वः प्रहिणोम्यक्षिताः॰॥ मंत्रयः॥ न ... लं पूजके नानिनीयमानं वरो नु
मंत्रयते॥ आचमनीयमाचमनीयमाचमनीयं॥ स्वाचमनीयं॥ अमृतोपस्त
रणमसि॥ नात्र शुश्रूषा चमनं॥ मधुपर्को मधुपर्को मधुपर्कः॥ सुमधुपर्कः॥
देवस्य त्वा सवितुः प्रस॰ हस्ताभ्यां प्रतिगृह्णामि॥ उभाभ्यां हस्ताभ्यां प्र
तिगृह्य॥ पृथिव्यास्त्वा॰ पदे॥ पृथिव्यां प्रतिष्ठाप्य॥ यन्मधुनो मधव्यं॰ या
सं॥ अंगुष्ठेनोपमध्यमात्र्यानामिकांगुल्या दत्रिः प्रदक्षिणं संयुज्य॥ तेजसे त्वा
श्रिये॰ प्राश्नामि॥ मंत्रावृत्त्या त्रिः प्राश्य॥ यो स्य शातिर्भवति तस्मा उच्छिष्टं प्रय
परममन्नाद्यं रूप॥ तेनाहं मधुनो मधव्येन परमे
... णान्नपेण परमो मधव्यो न्नादो सं ×२

(६)

त्वं तन्मा प्राशयेत तन्मे श्रीयतत तन्मउ जें धास्तत्स्तम्भूतं ॥ ४

विवा॰प्र॰ छाति सर्वं वा प्राश्य ॥ लोक विहिष्टत्वा दप्सु निक्षिपेत ॥ अमृतापिधानमसि ॥ आ
५ चमनीय शिष्टजलेनाचामति ॥ मुखं हस्तं च प्रक्षाल्य द्विराचामेत ॥ गोर्गौर्गौः
सुगोः ॥ गोर्धेनुभव्या माता रुद्राणां धेनु ॥ पिबतूदकं तृणान्यत्तु ॥ ॐ मुत्सृजत य
गामुत्सृजेत ॥ ॥ भूतं भूतं भूतं ॥ वरः ॥ तत्सु भूतं ॥ विराडं धास्तत्सुभूतं ॥ द्यो स्तभूतं
स्त्वददातु पृथिवी प्रतिगृह्णातु ॥ पिबतु ॥ पूजके न दत्त मन्त्रं प्रतिगृह्णाति ॥ इंद्राग्नी मे वर्चः कृ
णुतां वर्चः सोमोश्विना ॥ यावत्काम मन्त्रं प्राश्यामुखादिकं प्रक्षाल्य द्विराचामेत
॥ ॥ दाता गंधमाल्य वस्त्रयुगोपवीत युगाभरणादि यथाविभवं वराय दद्या
त ॥ वरेण सहागतांस्तद्वंधून पिपूजयेत ॥ मधुपर्कस्य सांगतासिध्यर्थं लक्ष्मी
नारायणस्वरूपिणे वराय इमां दक्षिणां तुभ्यमहं संप्रददे ॥ नमोस्त्वनंताय ॥ ५
॥ ॥ अथाश्वलायनीय मधुपर्कः ॥ पंचविंशति दर्भैः ॥ प्रागग्रं वामावर्तेन कृ
प्रतिगृह्णातु पृथिवी प्रतितेददातु प्राणः प्रतिगृह्णातु प्राणस्त्वा भातु प्राणः प्रतिगृह्णातु ५

Rajwade Sanshodhan Mandal, Dhule and Yashwantrao Chavan Pratishthan, Mumbai

(6A)

तंविष्टरं॥ पाद्यार्थ्यं आघ्यार्थं मंत्रवत्त्रिराचमनीयार्थं शुद्धाष्टाचमनीयार्थं ज
लपात्रचतुष्टयं मधुयुक्तदध्याख्यमधुपर्कं कांस्यपात्रे आनीयपिधायसू
त्रेणसंवेष्ट्य। गांचसंपाद्य॥ आचम्यदेशकालौस्मृत्वाकन्यार्थिनेगृहागता
यास्मैस्नातकायवरायकन्यादानांगभूतं मधुपर्कं करिष्ये॥ विष्टरोविष्टरो
विष्टरः॥ वरहस्तेदद्यात्॥ वरः॥ अहंवर्ष्मेत्यस्यवामदेवोविष्टरोनुष्टुप्॥ विष्ट
रोपवेशनेविनि॰ ॐ अहंवर्ष्मसजातानांविद्युतामिवसूर्यः॥ इदंतमधितिष्ठा
मियोमाकश्चाभिदासति॥ उदगग्रेविष्टरे प्राङ्मुखउपविशेत्॥ पाद्यंपाद्यं
पाद्यं॥ तेनोदकेनवरस्यपादौप्रक्षालयेत्॥ वरोलौकिकजलेनाचम्य॥ गंधमा
ल्यफलादियुक्तमर्घ्यजलमादाय॥ अर्घ्यमर्घ्यमर्घ्यं॥ वरांजलौनिनयेत्॥

(७)

वि॰प्र॰ आचमनीयमाचमनीयमाचमनीयं॥वस्त्रस्यैकदेशंगृहीत्वा॥अमृतोप
स्तरणमस्ति॥पीत्वाचम्य॥आनीयमानंमधुपर्कं॥मित्रस्यत्वाचक्षुषाप्रतीक्षे॥
६ अवेक्ष्य॥मधुपर्कोमधुपर्कोमधुपर्कः॥वरः॥देवस्यत्वासवितुः प्र॰भ्यांप्रतिगृ
ह्णामि॥अंजलिनागृह्य॥मधुवाताइतितृचस्यराहूगणोगोतमविश्वेदेवागायत्री
॥मधुपर्कावेक्षणेवि॰ॐमधुवाताऋतायते॰मधुनक्तमुतोषसोमधुमत्पार्थि
वंरजः॥मधु॰तुनः॥३॥अंजलिस्थंमधुपर्कमवेक्ष्य॥तत्पात्रंसव्यहस्तेधृत्वा॥
अंगुष्ठानामिकाभ्यांमधुपर्कंत्रिःप्रदक्षिणमालोड्य॥अंगुलिगतंमधुपर्कंले
पं॥वसवस्त्वागायत्रेणछंदसाभक्षयंतु॥पूर्वस्यांनिक्षिपेत्॥रुद्रास्त्वात्रैष्टुभेनछं
छंदसाभक्षयंतु॥दक्षिणतः॥आदित्यास्त्वाजागतेनछंदसाभक्षयंतु॥पश्चा ६
त्॥विश्वेत्वादेवाआनुष्टुभेनछंदसाभक्षयंतु॥उत्तरतः॥भूतेभ्यस्त्वा॥३॥

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(7A)

मंत्रावृत्त्या त्रिरूर्ध्वं क्षिपेत॥ मधुपर्कपात्रं भूमौ निधाय॥ मधुपर्कैकदेशं गृही
त्वा॥ विराजो दोहोसि॥ प्राश्याचम्य॥ पुनर्गृहीत्वा॥ विराजो दोहमशीय॥ प्राश्या
चम्य॥ पुनर्गृहीत्वा॥ मयि दोहः पद्यायै विराजः॥ प्राश्याचम्य॥ मधुपर्कशे
षमप्सु निक्षिप्य॥ अमृतापिधानमसि॥ आचमनीयशिष्टा अपः किंचित्पी
त्वा लौकिकजलेनाचम्य॥ आचमनीयशेषां सर्वं गृहीत्वा॥ सत्यं यशः श्री
र्मयि श्रीः श्रयतां॥ सर्वं प्राश्य लौकिकोदकेन द्विराचामेत्॥ गौर्गौर्गौः॥ माता
रुद्राणामित्यस्य भार्गवो जमदग्निर्गौस्त्रिष्टुप्॥ गोरुत्सर्जने गम्भूते जपे वि०
ॐ माता रुद्राणां दुहिता वसूनां स्वसादित्यानाममृतस्य नाभिः॥ प्रनुवोचं
चिकितुषे जनाय मा गामनागामदितिं वधिष्ट॥ ओमुत्सृजत॥ इत्युत्सृज्य गामु
त्सृजेत्॥ दाता गंधमाल्यवस्त्रयुग्मोपवीतयुग्माभरणादि यथाविभवं वरायद

(४)

वि॰प्र॰ घात्॥ वरेणसहागतांस्तद्बंधूनपिपूजयेत्॥ कृतस्यमधुपर्कस्यसांगतासिध्य
७ र्थंलक्ष्मीनारायणस्वरूपिणेवरायइमांदक्षिणांतुभ्यमहंसंप्रददे॥ नमोस्त्वनं
तायः॥ इतिमधुपर्कः॥ ॥ ब्राह्मणाः स्वलंकृतेवेश्मनिमंडपेवाहस्तांतरालं
स्थलंविहायप्रस्थमिततंडुलैर्द्वौराशीकृत्वास्वस्तिकांकितमंतःपटंराश्योर्मध्ये
उत्तरदशंधारयित्वापूर्वराशौप्रत्यङ्मुखींवधूं॥ पश्चिमराशौप्राङ्मुखंवरं॥ आ
श्वलायनेवरेप्रत्यङ्मुखोवरः॥ प्राङ्मुखीकन्यां॥ वधूवरौतंडुलजीरकायुतां
४से जलीउभौमनसेष्टदेवतांध्यायंतौसमाहितौतिष्ठेतां॥ अस्मिन्नवसरेज्यो
तिर्विदामंगलं॥ पद्यपाठपूर्वकंतदेवलग्नंॐप्रतिष्ठा॥ इत्युक्तेसद्योंतःपटमु
दगपसार्यवधूवराभ्यांपरस्परनिरीक्षणंचकारयेयुः॥ आश्वलायनवरश्चेत् ७
॥ अभ्रातृघ्नींवरुणापतिघ्नींबृहस्पते॥ इंद्रापुत्रघ्नींलक्ष्म्यंताम्स्यैसवितः

(8A)

सव॥ इतिजपन्वधूमीक्षेत॥ अघोरचक्षुरपतिघ्न्येधिशिवापशुभ्यः सुमनाः सुवर्चाः
॥वीरसूर्देवकामास्योनाशन्नोभवद्विपदेशंचतुष्पदे॥वीक्षमाणोजपित्वादर्भाग्रेणतस्याभ्रुवो
र्मध्ये॥ॐ भूर्भुवः स्वः॥व्याहृतीभिः परिमृज्य॥दर्भंनिरस्यापउपस्पृशेत्॥ततोवधूवराभ्यांप
रस्परंचतुर्वारंपंचवारंवाकन्यापूर्वकंअंजलिस्थतंडुलजीरकावकिरणंकारयेयुः॥विप्राऋ
क्केवेत्यादिखंडानि॥अस्मेदेवासो०॥प्रजापतिःसोमः॰राजानम०॥सिं॰हे व्याघ्रउतयापृ०॥
नर्यप्रजांमेगोपा०॥तत्तदंतेअक्षतारोपणंचकुर्युः॥आश्वलायनोवरश्चेत्॥अनृक्षराऋ
जवःसंतु॰देवाः॥वरंप्राङ्मुखंवधूंप्रत्यङ्मुखींकुर्यात्॥ ॥ ॥अथकन्यादानं॥॥
कन्यादाताअलंकृतांपीतवस्त्रंपरिधानांकन्यांवरायदद्यात्॥वधूवरयोर्दक्षिणतः सपत्नीक
उदङ्मुखःकन्यादाताउपविश्याचम्यपवित्रपाणिः प्राणानायम्य गुर्वादीन्नमस्कृत्यदेशकालौ
संकीर्त्य॥ममसमस्तपितॄणांनिरति[illegible]शयसानंदब्रह्मलोकावाप्त्यादिकन्याप्रतिपादनक
ल्पोक्तफलावाप्तयेअनेनवरेणास्यांकन्यायामुत्पादयिष्यमाणसंतत्याद्वादशावरान्द्वा

(९)

वि·प्र·

८

दशापरान्पुरुषान्पवित्रीकर्तुं आत्मनश्चलक्ष्मीनारायणप्रीतये ब्राह्मविवाहविधिना कन्या
प्रतिपादनमहं करिष्ये॥ सपत्नीक उत्थाय॥ उदङ्मुख एव कन्यां संप्रतिगृह्य॥ कन्यां कनक
संपन्नां कनकाभरणैर्युतां॥ दास्यामि विष्णवे तुभ्यं ब्रह्मलोकजिगीषया॥१॥ विश्वंभरः सर्व
भूताः साक्षिण्यः सर्वदेवताः॥ इमां कन्यां प्रदास्यामि पितृणां तारणाय च॥ २॥ इति मंत्रौ पठि
त्वा कांस्यपात्रोपरिधृतकन्यांजलयुपरि रुद्धवरांजलि दक्षिणहस्ते सयवाक्षततुलसीपत्र
कुशहस्ता यजमानः भार्यादत्तसंततधारोदकं क्षिपेन्वदेत्॥ कन्या तारयतु॥ पुण्यं वर्ध
तां॥ शिवा आपः संतु॥ सौमनस्यमस्तु॥ अक्षतं चारिष्टं चास्तु॥ दीर्घमायुः श्रेयः शांतिः
पुष्टिस्तुष्टिश्चास्तु॥ यच्छ्रेयस्तदस्तु॥ यत्पापं तत्प्रतिहतमस्तु॥ पुण्याहं भ० स्वस्ति भवं
तो० ऋद्धिं भवंतो ब्रुवंतु॥ श्रीरस्त्विति भवंतो ब्रुवंतु॥ अमुकगोत्रोमुकशर्माहं मम समस्तपि
तृणां नि० प्रीतये॥ अमुकगोत्रोत्पन्नायामुकप्रपौत्रायामुकपौत्रायामुकपुत्राय अ

(9A)

मुकशर्मणेकन्यार्थिनेश्रीधररूपिणेवराय॥अमुकप्रवरान्वितामुकगोत्रोत्पन्नांअमुक
प्रपौत्रींअमुकपौत्रींअमुकस्यममपुत्रींअमुकनाम्नींकन्यांवरार्थिनींश्रीरूपिणींयथाश॥
क्त्यलंकृतांप्रजापतिदैवत्यांप्रजासहत्वकर्मभ्यस्तुभ्यमहंप्रतिपादये॥जलंवरहस्तेक्षि
पेत्॥वरः॥ॐस्वस्ति॥ॐतथेतिवाप्रतिगृह्णीयात्॥दातुर्नममेतिनभवति॥वरस्यप्र
तिग्रहमंत्रोनभवति॥एवंकन्यातारयितादिॐस्वस्तीत्यंतंवारंद्वयंपुनःकार्यं॥ ॥
कन्यादातावरश्चआश्वलायनश्चेत्॥ममसमस्तपि० कन्यादानकल्पोक्तफलावा० ब्राह्म
विवाहविधिनाकन्यादानमहंकरिष्ये॥सपत्नीकोत्थायेत्यादि॥प्रजापतिदैवत्यांप्रजोत्प
ादनार्थंतुभ्यमहंसंप्रददे॥नममकन्यांप्रतिगृह्णातुभवान्॥वरहस्तेजलंक्षिपन्प्रजा
पतिःप्रीयतांमनसास्मरेत्॥एवंपुनर्द्विः॥वरः॥ॐस्वस्तीत्युक्त्वाकन्यायाःदक्षिणांसम
भिमृश्य॥कइदंकस्माअदात्॥कामःकामायादात्कामोदाताकामःप्रतिग्रहीताकामंस

...project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(१०)

वि॰प्र॰ मुद्रमाविश्राकामेनत्वाप्रतिगृह्णामिकामैतत्तेवृष्टिरसिद्यौस्त्वाददातुपृथिवीप्रतिगृह्णातु॥
९ इतिजपित्वा॥धर्मप्रजासिध्यर्थंकन्यांप्रतिगृह्णामि॥इतिवदेत्॥ ॥अथोभयत्रसमानं
॥कन्यादाता॥गौरींकन्यामिमांविप्रयथाशक्तिविभूषितां॥गोत्रायशर्मणेतुभ्यंदत्तांविप्रस
माश्रय॥कन्येममाग्रतोभूयाःकन्येमेदेविपार्श्वयोः॥कन्येमेपृष्ठतोभूयास्त्वद्दानान्मोक्ष
माप्नुयां॥ममवंशकुलेजातापालितावत्सराष्टकं॥तुभ्यंविप्रमयादत्तापुत्रपौत्रप्रवर्धिनी॥
॥धर्मेचार्थेचकामेचनातिचरितव्यात्वयेयं॥वरः॥नातिचरामि॥दाता॥कृतस्यकन्या
दानस्यसांगतासिध्यर्थंयथाविभवकल्पितमिदंअग्निदैवत्यंहिरण्यंदक्षिणात्वेनतुभ्य
महंसंप्रददे॥वरहस्तेदत्वाननमेतिवदेत्॥देवस्यत्वासवितुः॰क्षिणेग्नयेहिरण्यंतेनामृत
त्वम॰ह्णातु॥आश्वलायनवरश्चेत्॥कइदंकस्माअ॰ॐस्वास्ति॥ ॥दाताजलपात्रभो
जनपात्रगोमहिष्यश्वदासीदासभूशय्यालंकारादियथाविभवंवरायदद्यात्॥ ॥अ

(10A)

अथदानमंत्राः॥ताम्रपात्रस्य॥ परापवादपैशून्यादभक्षस्यचभक्षणात्॥उत्पन्नपापंदानेन
ताम्रपात्रस्यनश्यतु॥कांस्यपात्रस्य॥यानिपापानिकाम्यानिकामोत्थानिकृतानितु॥कांस्यपा
त्रप्रदानेनतानिनश्यंतुमेसदा॥रौप्यपात्रस्य॥अगम्यागमनंचैवपरदाराभिमर्शनं॥ ॥
रौप्यपात्रप्रदानेनतानिनश्यंतुमेसदा॥सुवर्णपात्रस्य॥जन्मांतरसहस्रेषुयत्कृतंपातकंम
या॥स्वर्णपात्रप्रदानेनतानिनश्यंतुमेसदा॥गोः॥यज्ञसाधनभूतायाविश्वस्याघौघनाशि
नी॥विश्वरूपधरोदेवः प्रीयतामनयागवा॥महिष्याः॥ इंद्रादिलोकपालानांयाराज्यमहिषी
प्रिया॥महिषासुरस्यजननीसास्तुमेसर्वकामदा॥अश्वस्य॥महार्णवसमुत्पन्नउच्चैःश्र
वसपुत्रक॥सोपस्करस्त्वंविप्रायदत्तःशांतिंप्रयच्छमे॥गजस्य॥सुप्रतीकगजेंद्रस्त्वंसरस्व
त्याभिषेचितं॥इंद्रस्यवाहनंशश्वत्सर्वदेवैःसुपूजितं॥विप्रतुभ्यंददामीमंत्तेनशांतिंप्रयच्छ
मे॥दास्याः॥इयंदासीमयातुभ्यंश्रीवत्सप्रतिपादिता॥सदाकर्मकरीहद्यायथेष्टंमभ्युते॥दा भद्र
सस्य॥अयंदासोमयातुभ्यंश्रीवत्सप्रतिपादितः॥सदाकर्मकरोहद्योममशांतिंप्रयच्छतु।

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

## मूळ प्रत पाहण्यासाठी संपर्क


**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**

राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)

**दूरध्वनी क्रमांक** (०२५६२) २३३८४८

**Email ID** : rajwademandaldhule@gmail.com